**Shri Raghunatha Temple MSS. Library,**
**JAMMU**

No. २२६७ क. — २२६८ ख — २२६९ ग.

Title क. शरणागति गद्यम्
ख. श्रीरंग गद्यम्
ग. वैकुण्ठ गद्यम्.

Author श्रीरामानुजाचार्यः

Extent 6 Age

Subject वेदान्त शास्त्रं

© Dharmartha Trust JK. Digitized by eGangotri

क० शरणागतिगद्यम् ३

ख० श्रीरंगगद्यम् २

ग० वैकुण्ठगद्यम् २

२२६७

२२६८

२२६९

F. 2267, 68, 69

7

Complete

© Dharmartha Trust JK. Digitized by eGangotri

वैकुंठगद्य

© Dharmartha Trust JK. Digitized by eGangotri

श्रीमते रामानुजाय नमः॥ यो नित्यमच्युतपदांबुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने अस्मद्गुरोर्भगव
1 तोस्य दयैकसिंधो रामानुजस्य चरणौ शरणं प्रपद्ये १ लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो योसौ पुरा समजनि
ष्ट जगद्धितार्थं प्राच्यं प्रकाशयतु नः परमं रहस्यं संवाद एष शरणागतिमंत्रसारः २ भगवन्नारायणाभिमतानु
रूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याण गुणगणां पद्मवनालयां भगव
तीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीं अखिलजगन्मातरमस्मन्मातरमशरण्यशरण्यां
अनन्यशरणः शरणमहं प्रपद्ये पारमार्थिकभगवच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञान
परमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभग
वदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्राप्त्यपे
क्षया पारमार्थिकी भगवच्चरणारविंदशरणागतिर्यथावस्थिताविरतास्तु मे अस्तु ते तयैव सर्वं संपत्स्यते
अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानंतज्ञानानंदैकस्वरूपस्वाभिमतानुरू
पैकरूपाचिंत्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौंदर्यसौगंध्यसौकुमार्यलावण्ययौवनाद्यनं
तकल्याणगुणगणनिधिदिव्यरूप स्वाभाविकानंतमहाविभवानंतपरिमाण नित्यनिरवद्यनिरतिशय श्रीवै
कुंठनाथ स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभाव प्रकृतिपुरुषकालात्मकवि

© Dharmartha Trust JK. Digitized by eGangotri

विकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः सौशील्यवात्सल्यमार्दवार्जवसौहार्द साम्यका
रुण्यमाधुर्यगांभीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसंकल्पकृतित्वकृतज्ञता
द्यसंख्येयकल्याणगुणगणौघमहार्णव स्वोचितविविधविचित्रानंताश्चर्यनित्यनिरवद्यनिरतिशयसु
गंधनिरतिशयसुखस्पर्शनिरतिशयौज्वल्यकिरीटमुकुटचूडावतंसमकरकुंडलग्रैवेयकहारकेयूरकट क
कश्रीवत्सकौस्तुभमुक्तादामोदरबंधनपीतांबरकांचीगुणनूपुराद्यपरिमितदिव्यभूषण स्वानुरूपाचिंत्य
शक्तिशंखचक्रगदासिशार्ङ्गाद्यसंख्येयनित्यनिरवद्यनिरतिशयकल्याणगुणगण दिव्यायुध स्वाभि
मतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीव
ल्लभ एवंभूतभूमिनीलानायक स्वच्छंदानुवर्त्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनि
रतिशयज्ञानक्रियैश्वर्याद्यनंतकल्याणगुणगणशेषशेषाशनगरुडप्रमुखनानाविधानंतपरिजनपरिचा
रिकापरिचरितचरणयुगल परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभाव स्वाभिमतविविधविचित्रा
नंतभोग्यभोगोपकरणभोगस्थानसमृद्धनंताश्चर्यानंतमहाविभवानंतपरिमाणनित्यनिरवद्यनिर
तिशयश्रीवैकुंठनाथ स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभाव प्रकृतिपुरुष
कालात्मकविविधविचित्रानंतभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूपनिखिलजगदुदयवि
भवलयलीलसत्यकामसत्यसंकल्पपरब्रह्मभूतपुरुषोत्तममहाविभूते श्रीमन्नारायणश्रीवैकुंठना

© Dharmartha Trust JK. Digitized by eGangotri

थ अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधे अनालोचितविशेषाशेषलो
२ कशरण्यप्रणतार्तिहराश्रितवात्सल्यैकजलधे अनवरतविदितनिखिलभूतजातयाथात्म्य
अशेषचराचरभूतनिखिलनियमननिरत अशेषचिदचिद्वस्तुशेषीभूत निखिलजगदाधार
४ अखिलजगत्स्वामिन् अस्मत्स्वामिन् सत्यकाम सत्यसंकल्प सकलेतरविलक्षण अर्थिकल्पक
आपत्सख श्रीमन्नारायण अशरण्यशरण्य अनन्यशरणस्त्वत्पादारविंदयुगलं शरणमहं प्र
पद्ये अत्र द्वये पितरं मातरं दारान्पुत्रान्बंधून्सखीन्गुरून्रत्नानि धनधान्यानि क्षेत्राणि च गृ
हाणि च सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान् लोकविक्रांतचरणौ शरणं तेऽव्रजं विभो त्वमे
व माता च पिता त्वमेव त्वमेव बंधुश्च गुरुस्त्वमेव त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रये
प्यप्रतिमप्रभाव तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव स
ख्युः प्रियः प्रियायार्हसि देव सोढुं मनोवाक्कायैरनादिकालप्रवृत्तानंताकृत्यकरणकृत्याकरणभ
गवदपचारभागवतापचारासह्यापचाररूपनानाविधानंतापचारानारब्धकार्याननारब्ध
कार्यान्कृतान्क्रियमाणान्करिष्यमाणांश्च सर्वानशेषतः क्षमस्व अनादिकालप्रवृत्तविप
रीतज्ञानमात्मविषयं कृत्स्नजगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापि वर्तमानं वर्तिष्य २

© Dharmartha Trust JK. Digitized by eGangotri

मानं च सर्वं क्षमस्व  महीयानादिकर्मप्रवाहप्रवृत्तां भगवत्स्वरूपतिरोधानकरीं विपरीतज्ञानजननीं स्वविष
याश्च भोग्यताबुद्धेर्जननीं देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थितां दैवीं गुणमयीं मायां दास
भूतः शरणागतोस्मि तवास्मि दास इति वक्तारं मां तारय  तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते
प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः इत्यादि श्लोकत्रयोदितपरज्ञानिनं मां कुरुष्व  पुरुषः स परः पा
र्थ भक्त्या लभ्यस्त्वनन्यया  भक्त्या त्वनन्यया शक्या मद्भक्तिं लभते परामिति स्थानत्रयोदितपरभक्तियुक्तं
मां कुरुष्व  परभक्तिपरज्ञानपरमभक्त्यैकस्वभावं मां कुरुष्व  परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरत
नित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोहं  तथाविधभगवदनुभवजनितान
वधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंकरो भवानि  एवंभूतमत्कै
कर्यप्राप्त्युपायतया क्लृप्तसमस्तवस्तुविहीनोप्यनन्ततद्विरोधिपापाक्रान्तोप्यनन्तमदपचारयुक्तोप्यने
तमदीयापचारयुक्तोप्यनन्तासह्यापचारयुक्तोप्येतत्कार्यकारणभूतानादिविपरीताहंकारविमूढात्म
स्वभावोप्येतदुभयकार्यकारणभूतानादिविपरीतवासनासंबद्धोप्येतदनुगुणप्रकृतिविशेषसं
बद्धोप्येतन्मूलाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखतद्धेतुतदितरोपेक्षणीयविषयानुभवज्ञान
संकोचरूपमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोपि येन केना

© Dharmartha Trust JK. Digitized by eGangotri

पिप्रकारेणाद्यप्रवृत्तं केवलं मदीययैव दययानिःशेषविनष्टसहेतुकमच्चरणारविंदयुगलैकांतिकात्यं
3 तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नो मत्प्रसादलब्धमच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञा
3 नपरमभक्तिर्मत्प्रसादादेव साक्षात्कृतयथावस्थितमत्स्वरूपरूपगुणविभूतिलीलोपकरणविस्तारो
परोक्षसिद्धमन्नियाम्यतामद्दास्यैकस्वभावात्मस्वरूपो मदेकानुभवो मद्दास्यैकप्रियपरिपूर्णानवर
तनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं तथाविधमदनुभवस्त्वं तथावि
धमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंक
रो भव एवंभूतोसि आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगंधरहितस्त्वं द्वयमर्थानुसंधानेन स
ह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरंगे सुखमास्व शरीरपातसमये तु केवलं मदीययैव दययाति
प्रबुद्धो मामेवावलोकयन्नप्रच्युतपूर्वसंस्कारमनोरथो जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं स्थूलसूक्ष्मरू
पां विसृज्य तदानीमेव मत्प्रसादलब्धमच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञानपरमभक्तिकृ
तपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवजनितानवधिकाति
शयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंकरो भविष्यसि मा ते भूदत्र संशयः 3
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन रामो द्विर्नाभिभाषते सकृदेव प्रपन्नाय तवास्मीति च याचते अ

© Dharmartha Trust JK. Digitized by eGangotri

भयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वा सर्वपापेभ्यो मोक्षयिष्या
मि मा शुच इति मयैव ह्युक्तं अतस्त्वं तव तत्त्वतो मद्ज्ञानदर्शनप्राप्तिषु निःसंशयः सुखमास्व अंतकाले स्मृतिर्या तु त
व कैंकर्यकारिता तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे इति श्रीमद्भगवद्रामानुजाचार्यविरचितं शरणा
गतिगद्यं संपूर्णं श्रीमते रामानुजाय नमः स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थिति प्रवृत्तिभेदं क्लेशकर्मा
द्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः सौशील्यवात्सल्यमा
र्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगांभीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसंक
ल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णवं परब्रह्मभूतं पुरुषोत्तमं श्रीरंगशायिनमस्म
त्स्वामिनं प्रबुद्धनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावोहं तदेकानुभवस्तदेकप्रियपरिपूर्णं भगवंतं नि
त्यविशदतमानुभवेन निरंतरमनुभूय तदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशे
षशेषतैकरतिरूपनित्यकिंकरो भवानि स्वात्मनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावानुसंधानपूर्वकं
भगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्राप्त्यु
पायभूतभक्तितदुपायसम्यक्ज्ञानतदुपायसमीचीनक्रियातदनुगुणसात्विकतास्तिक्यादिसमस्तात्मगुणवि
हीनो दुरुत्तरानंततद्विपर्ययज्ञानक्रियानुगुणानादिपापवासनामहार्णवांतर्निमग्नः तिलतैलवद्दारुवह्नि

© Dharmartha Trust JK. Digitized by eGangotri

वद्भ्विवेचनीयत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूपदुरत्ययभगवन्मायातिरोहितस्वप्रका
शोनाद्यविद्यासंचितानंताशक्यविस्रंसनकर्मपाशप्रग्रथितोनागतानंतकालसमीक्षयाप्यदृष्टसंतारो
४ पायोनिखिलजंतुजातशरण्य श्रीमन्नारायणतवचरणारविंदयुगलंशरणमहंप्रपद्ये एवमवस्थि
तस्याप्यर्थित्वमात्रेणपरमकारुणिकोभगवान्स्वानुभवप्रीत्योपनीतैकांतिकात्यंतिकनित्यकैंकर्यैकरति
रूपनित्यदास्यंदास्यतीतिमह्यंविश्वासपूर्वकंभगवंतंनित्यकिंकरतांप्रार्थयेतवानुभूतिसंभूतप्रीतिकारित
दासतांदेहिमेकृपयानाथनजानेगतिरन्यथा सर्वावस्थोचिताशेषशेषतैकरतिस्तवभवेयंपुंडरीकाक्षत्व
मेवैवंकुरुष्वमां एवंभूततत्वयाथात्म्यावबोधितदिच्छारहितस्याप्येतदुच्चारणमात्रावलंबनेनोच्यमा
नार्थपरमार्थनिष्ठंमेमनस्त्वमेवाद्यैवकारय अपारकारुण्यांबुधे अनालोचितविशेषाशेषलोकशरण्य
प्रणतार्तिहरआश्रितवात्सल्यैकमहोदधे अनवरतविदितनिखिलभूतजातयाथात्म्य अशेषचराचरभूत
निखिलनियमननिरताशेषचिदचिद्वस्तुशेषिभूतनिखिलजगदाधार अखिलजगत्स्वामिन्नस्मत्स्वा
मिन्सत्यकामसत्यसंकल्पसकलेतरविलक्षण अर्थिकल्पक आपत्सखकाकुत्स्थ श्रीमन्नारायणपु
रुषोत्तमश्रीरंगनाथममनाथनमोस्तुते इतिश्रीमद्भगवद्रामानुजाचार्यविरचितंश्रीरंगगद्यंसंपूर्णं श्रीम
तेरामानुजायनमः अनंतानंतशयनपुंडरीकपुरुषोत्तमश्रीरंगनाथजगन्नाथजगन्नाथनाथतुभ्यंनमोन

© Dharmartha Trust JK. Digitized by eGangotri

मः ॥ यामुनार्य्यसुधांभोधिमवगाह्य यथामतिः । आदाय भक्तियोगाख्यं रत्नं संदर्शयाम्यहं ॥ स्वाधीनत्रिविध
चेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलै
श्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवं परमपुरुषं भगवंतं नारायणं स्वामि
त्वेन गुरुत्वेन सुहृत्त्वेन च परिगृह्यैकांतिकात्यंतिकतत्पादांबुजद्वयपरिचर्य्यैकमनोरथस्तत्प्राप्तये च तत्पा
दांबुजद्वयप्रपत्तेरन्यन्नमे कल्पकोटिसहस्रेणापि साधनमस्तीतिमन्वानः तस्यैव भगवतो नारायणस्याखि
लसत्वदयैकसागरस्यानालोचितगुणगणाखंडजनानुकूलमर्यादाशीलवतः स्वाभाविकानवधिकाति
शयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिलजनहृदयानंदनस्याश्रितवात्सल्यैकजलधेर्भक्तजनसंश्लेषै
कभोगस्य नित्यज्ञानक्रियैश्वर्य्यभोगसामग्रीसमृद्धस्य महाविभूतेः श्रीमच्चरणारविंदयुगलमनन्या
त्मसंजीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत् चतुर्दशभु
वनात्मकमंडं दशगुणितोत्तरं चावरणसप्तकं समस्तं कार्य्यकारणजातमतीत्य परमव्योमशब्दाभिधेये ब्रह्मा
दीनां वाङ्मनसागोचरे श्रीमति वैकुंठे दिव्यलोके सनकसनंदनविधिशिवादिभिरप्यचिंत्यस्वरूपस्वभावैश्व
र्ये नित्यसिद्धैरनंतैः भगवदानुकूल्यैकभोगैर्दिव्यपुरुषैर्महात्मभिरापूरिते तेषा
मपीयत्परिमाणमियदैश्वर्यमीदृशस्वभावमिति परिच्छेत्तुमयोग्ये दिव्यावरणशतसहस्रावृते दिव्यक

© Dharmartha Trust JK. Digitized by eGangotri

ल्पनरुपशोभिते दिव्योद्यानशतसहस्रकोटिभिरावृते अतिप्रमाणे दिव्यायतने कस्मिंश्चिद्विचित्रदिव्य
५ रत्नमयदिव्यस्थानमंडपे दिव्यरत्नस्तंभशतसहस्रकोटिभिरुपशोभिते दिव्यनानारत्नकृतस्थलविचित्रिते
दिव्यालंकारालंकृते परितः पतितैः पतमानैः पादपस्थैश्च नानागंधवर्णैर्दिव्यपुष्पैः शोभमानैः दिव्यपुष्पो
पवनैरुपशोभिते संकीर्णपारिजातादिकल्पद्रुमोपशोभितैरसंकीर्णैश्च कैश्चिदंतःस्थपुष्परत्नादिनिर्मि
तदिव्यलीलामंडपशतसहस्रोपशोभितैः सर्वदानुभूयमानैरप्यपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशतस
हस्रैरलंकृतैर्नारायणदिव्यलीलासाधारणैश्च कैश्चित्पद्मवनालयादिदिव्यलीलासाधारणैश्च कैश्चिर
शुकसारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलैर्दिव्योद्यानशतसहस्रैरावृते मणिमुक्ताप्रवालकृत
सोपानैर्दिव्यामलामृतरसोदकैर्दिव्यांडजवरैरतिरमणीयदर्शनैरतिमनोहरमधुरस्वरैराकुलैरंतःस्थमुक्ता
मणिमयदिव्यक्रीडास्थानोपशोभितैः दिव्यसौगंधिकवापीशतसहस्रैर्दिव्यराजहंसावलिभिर्विराजिते रा
वृते निरस्तातिशयानंदैकरसतयाचानंत्याच्च प्रविष्टानुन्मादयद्भिः क्रीडोद्यानदेशैर्विराजिते तत्र तत्र कृतदि
व्यपुष्पपर्यंकोपशोभिते नानापुष्पासवास्वादमत्तभृंगावलीभिरुद्गीयमाने दिव्यगांधर्वेणापू
रिते चंदनागरुकर्पूरादिदिव्यपुष्पावगाहितमंदानिलसेव्यमाने मध्ये दिव्यपुष्पसंचयविचित्रिते महति दि
व्ययोगपर्यंके नंतभोगिनि श्रीमद्वैकुंठैश्वर्यादिदिव्यलोकमात्मकांत्या विश्वमाप्याययंत्या शेषशेषासना

© Dharmartha Trust JK. Digitized by eGangotri

दिसर्वपरिजनंभगवतः तत्तदवस्थोचितपरिचर्यायामाज्ञापयंत्या शीलरूपगुणविलासादिभिरात्मानुरूपया
श्रियासहासीनं प्रत्यग्रोन्मीलितपुंडरीकसदृशनयनयुगलं स्वच्छनीलजीमूतसंकाशं अत्युज्ज्वलितपीतवाससं
स्वया प्रभया अतिनिर्मलया अतिकोमलयातिशीतलया स्वच्छमाणिक्यप्रभया कृत्स्नंजगद्भासयंतं अचिंत्यदि
व्याद्भुतनित्ययौवनंस्वभावलावण्यमयामृतसागरं अतिसौकुमार्यादीषत्प्रस्विन्नवदालक्ष्यमाणललाट
फलकंदिव्यालकावलिविराजितं प्रबुद्धमुग्धांबुजचारुलोचनंसविभ्रमभ्रूलतमुज्ज्वलाधरं शुचिस्मितंकोम
लगंडमुन्नसंललाटपर्यंतविलंबितालकं उदग्रपीनांसविलंबिकुंडलालकावलीबंधुरकंबुकंधरं प्रियावतं
सोत्पलकर्णभूषणश्लथालकाबंधविमर्दशंसिभिः चतुर्भिराजानुविलंबिभिर्भुजैर्विराजितं अतिकोमलदि
व्यरेखालंकृताताम्रकरतलदिव्यांगुलीयकैर्विराजितमतिकोमलदिव्यनखावलिविराजितानुरक्तांगुलिभिर
लंकृतंतत्क्षणोन्मीलितसरसिजसदृशचरणयुगलं अतिमनोहरकिरीटमुकुटचूडावतंसमकरकुंडलग्रैवे
यकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबंधनपीतांबरकांचीगुणनूपुरादिभिरत्यंतसुखस्पर्शैर्दि
व्यगंधैर्दिव्यभूषणैर्भूषितं श्रीमत्यावैजयंत्यावनमालयाविराजितं शंखचक्रगदासिशार्ङ्गादिदिव्यायुधैः
सेव्यमानंस्वसंकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमद्विष्वक्सेनेन्यस्तसमस्तात्मैश्वर्यं वैनते
यादिभिः स्वभावतोनिरस्तसमस्तसांसारिकस्वभावैर्भगवत्परिचर्याकरणयोग्यैर्भगवत्परिचर्यैकभोगै

© Dharmartha Trust JK. Digitized by eGangotri

र्नित्यसिद्धैरनंतैर्यथायोग्यं सेव्यमानं आत्मभोगेनानुसंधितपरादिकालं दिव्यामलकोमलावलोकनेन
विश्वमाह्लादयंतं ईषदुन्मीलितमुखांबुजविनिर्गतेन दिव्याननारविंदशोभाजननेन दिव्यगांभीर्यौदार्य
सौंदर्यमाधुर्याद्यनवधिकगुणगणविभूषितेन अतिमनोहरदिव्यभावगर्भितदिव्यलीलालापामृ
तेन अखिलजनहृदयांतराणि पूरयंतं भगवंतं नारायणं ध्यानयोगेन दृष्ट्वा ततो भगवतो नित्यस्वाम्य
आत्मनो नित्यदास्यं च यथावस्थितमनुसंधाय कदाहं भगवंतं नारायणं मम नाथं मम कुलदैवतं मम
कुलधनं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा कदाहं भगवत्पादांबुजद्वयं
शिरसा संग्रहीष्यामि कदाहं भगवत्पादांबुजद्वयपरिचर्याशया निरस्तसमस्तेतरभोगाशोऽपगतसम
स्तसांसारिकस्वभावः प्रबुद्धनित्यनिरवद्यनित्यदास्यैकरसात्मस्वभावस्तत्पादांबुजद्वयं प्रवेक्ष्यामि
कदाहं भगवत्पादांबुजद्वयपरिचर्याकरणयोग्यस्तदेकभोगस्तत्पादौ परिचरिष्यामि कदा
मां भगवान् स्वकीयया अतिशीतलया दृशावलोक्य स्निग्धगंभीरमधुरया गिरा परिचर्यायामा
ज्ञापयिष्यतीति भगवत्परिचर्यायामाशां वर्धयित्वा तयैवाशया तत्प्रसादोपबृंहितया भगवंतमुपे
त्य दूरादेव भगवंतं शेषभोगे श्रिया सहासीनं वैनतेयादिभिः सेव्यमानं समस्तपरिवाराय श्रीमते नारा
यणाय नमः इति प्रणम्य उत्थायोत्थाय पुनः पुनः प्रणम्य अत्यंतसाध्वसविनयावनतो भूत्वा भगवत्पार्षदग

© Dharmartha Trust JK. Digitized by eGangotri

ण नायकैर्द्वारपालैः कृपया स्नेहगर्भया दृशावलोकितः सम्यगभिवंदितैस्तैरेवानुमतो भगवंतमु
पेत्य श्रीमता मूलमंत्रेण मामैकांतिकात्यंतिकपरिचर्याकारणाय परिगृह्णीष्वेति याचमानः प्रणम्या
त्मानं भगवते निवेदयेत् ततो भगवता मर्यादाशीलवतातिप्रेमान्वितेनावलोकनेनावलोक्य सर्व
देशसर्वकालसर्वावस्थोचितात्यंतशेषभावाय स्वीकृतोनुज्ञातश्चात्यंतसाध्वसविनयावनतः
किंकुर्वाणः कृतांजलिपुटो भूत्वा भगवंतमुपासीत ततश्चानुभूयमानभावविशेषो निरतिशयप्रीत्या
न्यत्किंचित्कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानो भगवंतमेवाविच्छिन्नस्रोतोरूपेणा
वलोकनेनावलोकयन्नासीत ततो भगवता स्वयमेवात्मसंजीवनेनावलोकनेनावलोक्य सस्मितमा
हूयमानः समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविंदयुगलं शिरसि कृतं ध्यात्वा
मृतसागरांतर्निमग्नः सर्वावयवः सुखमासीत शारीरकेपि भाष्ये यो गोपिता शरणागतिः अत्र
गद्यत्रये व्यक्ता तां विद्यां प्रणतोस्म्यहं श्रीमते रामानुजाय नमः वंदे वेदांतकर्पूरचामीकरकरंडकं रा
मानुजार्यमार्याणां चूडामणिमहर्निशं ॥ इति श्रीमद्भगवद्रामानुजाचार्यविरचितं श्रीवैकुंठगद्यं संपूर्णं



© Dharmartha Trust JK. Digitized by eGangotri

वेदना

© Dharmartha Trust JK. Digitized by eGangotri